# ॥ श्री त्रैलोक्य मोहन काली कवचम् ॥
# Shri Trilokya Mohan Kali Kavach

॥ ॐ गण गणपतये नमः ॥

॥ श्री देव्युवाच ॥
देवदेवमहादेव संसारप्रीतिकारकः ।
सर्वविद्येश्वरीं विद्यां कालिकां कथयाद्भुताम् ॥ १ ॥

॥ श्री शिव उवाच ॥
श्रृणुदेवि महाविद्यां सर्वविद्योत्तमोत्तमाम् ।
सर्वेश्वरीं महाविद्यां सर्वदेवप्रपूजिताम् ॥ २ ॥
यस्याः कटाक्षमात्रेण त्रैलोक्यविजयीहरः ।
बभूवकमलानाथो विभुब्रह्मा प्रजापति ॥ ३ ॥

शचीस्वामीदेवनाथो यमोपिधर्मनायकः ।
त्रैलोक्यपावनी गङ्गा कमला श्रीर्हरिप्रिया ॥ ४ ॥
दिनस्वामिरविश्चन्द्रो निशापतिर्ग्रहेश्वरः ।
जलाधिपतिर्वरुणः कुबेरोपिधनेश्वरः ॥ ५ ॥

अव्याहतगतिर्वायुर्गजास्योविघ्ननायकः ।
वागीश्वरः सुराचार्यो ??गुरुः कविः ॥ ६ ॥
एवं हि सर्वदेवाश्च सर्वसिद्धिश्वराः प्रिये ।
तस्यास्तु कवचं दिव्यं मातृजारं विभावय ॥ ७ ॥

अस्य श्रीदक्षिणकालीकवचमन्त्रस्य भैरव ऋषिः,
अनुष्टुप् छन्दः, श्मशानकाली देवता,धर्मार्थकाममोक्षार्थे,
जपे विनियोगः ।ललाटं पातु चक्रीं मे हरेणाराधितं सदा ।
नेत्रेमे रक्षतु क्रीं क्रीं विष्णुना सेविता पुरा ॥ ८ ॥

क्रीं हूँ ह्रीं नासिकां पातु ब्रह्मणा सेविता पुरा ।

क्रीं क्रीं क्रीं वदनं पातु शक्रेणाराधिता सदा ॥९॥
क्रीं स्वाहा श्रवणं पातु यमेनैवप्रपूजिता ।
क्रीं हूं ह्रीं स्वाहा रसना गङ्गयासेवितावतु ॥१०॥

दन्तपङ्क्ति सदा पातु ॐ क्रीं हूं ह्रीं स्वाहा मम ।
भुक्तिमुक्ति प्रदा काली श्रिया नित्यं सुसेविता ॥११॥
ओष्टाधरं सदा पातु क्रीं क्रीं क्रीं
हूं हूंह्रीं ह्रीं मम सर्वसिद्धिप्रदायिका ॥१२॥

कण्ठं पातु महाकाली ॐ क्रीं ह्रीं मे स्वाहामम
चन्द्रेणाराधिता चतुर्वर्गफलप्रदा ॥१३॥
हस्तयुग्मं सदा पातु क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं
स्वाहासौख्यदा मोक्षदा काली वरुणेनैवसेविता ॥१४॥

ॐ क्रीं हूं ह्रीं फट् स्वाहा हृदयं पातु सर्वदा ।
सर्वसम्पत्प्रदा काली कुबेरेणोपसेविता ॥१५॥
ऐं ह्रीं ॐ ऐं हूं फट् स्वाहा हस्तयुग्मं सदावतु ।
वायुनोपासिताकाली यशोबल सुखप्रदा ॥१६॥

क्रीं क्रीं हूं हूं ह्रीं ह्रीं फट् पातु जठरं मम ।
सर्वसिद्धिप्रदा काली गणनाथेन सेविता ॥१७॥
क्रीं दक्षिणे कालिके ह्रीं स्वाहा नाभिं ममावतु ।
सिद्धिबुद्धिकरी काली गुरुणा सेविता पुरा ॥१८॥

लिङ्गं पातु सदा हूं हूं दक्षिणे कालिके ह्रीं ।
शुक्रेणराधिता काली त्रैलोक्यजयदायिनी ॥१९॥
पात्वण्ड कोशं क्रीं क्रीं दक्षिणे कालिके ह्रीं ह्रीं स्वाहा ।
धरया सेविता विद्या सर्वरत्न प्रदायिनी ॥२०॥

पातुं गुदं क्रीं क्रीं दक्षिणे कालिके ह्रीं स्वाहा ।
द्वादशीचमहाविद्या राघवेणार्चिता सदा ॥२१॥

जानुनी पातु ॐ क्रीं क्रीं दक्षिणे कालिके स्वाहा ।
एकादशी महाविद्या मेघनादेन सेविता ॥ २२ ॥

क्रीं क्रीं दक्षिणे कालिके ह्रीं ह्रीं स्वाहा जङ्घेवतुद्वादशीच
महाविद्या प्रह्लादेनचसेविता ॥ २३ ॥
क्रीं हूँ ह्रीं दक्षिणे कालिके क्रीं हूँ ह्रीं तथाङ्गुलीः ।
पातु मे द्वादशीकाली क्षेत्रपालेन सेविता ॥ २४ ॥

क्रीं हूँ ह्रीं दक्षिणे कालिके क्रीं हूँ ह्रीं स्वाहा ।
च नखान्सर्वात्सदा पातु पञ्चदशीत् ग्रहेश्वरी ॥ २५ ॥
क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं मम
पृष्ठे सदा पातु षोडशी परमेश्वरी ॥ २६ ॥

क्रीं क्रीं क्रीं पातु रोमाणि हूँ हूँ रक्षतु वर्मणि ।
मांसं पातु सदा ह्रीं ह्रीं रक्तं दक्षिणे कालिके ॥ २७ ॥
क्रीं क्रीं क्रीं पातु मे अस्थिमज्जां हूँ हूँ सदावतु ।
ह्रीं ह्रीं शुक्रं सदा पातु रंध्रं स्वाहा ममावतु ॥ २८ ॥

द्वाविंशत्यक्षरी विद्या सर्वलोकेषु दुर्लभा ।
महाविद्येश्वरी विद्या सर्वतन्त्रेषु गोपिता ॥ २९ ॥
सूर्यवंशेन सोमेन रामेणजग्निना ।
जयन्ते न सुमन्ते न बलिनानारदेन च ॥ ३० ॥

बिभीषणेनबाणेन भृगुणाकश्यपेन च ।
कपिलेन वसिष्ठेन धौम्येन त्रिपुरेण च ॥ ३१ ॥
मार्कण्डयेन ध्रुवेणैवद्रोणेन सत्यभामया ।
ऋष्यश्रृङ्गेन कर्णेन भारद्वाजेन संयुता ॥ ३२ ॥

सर्वेणाराधिता विद्या जरामृत्यु विनाशिनी ।
पूर्णविद्या महाकाली विद्याराज्ञी प्रकीर्तिता ॥ ३३ ॥
काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।

विप्रचित्ता तथोग्रप्रभा दीप्ता घनत्विषा ॥ ३४ ॥

नीला घना बलाका च मात्रा मुद्रामितापि च ।
एता: सर्वा खड्गधरा मुण्डमाला विभूषणा ॥ ३५ ॥
हूँ हूँकारेट्टहासेन सर्वत्र पातु मां सदा ।
ब्रह्माणी पातु मां पूर्वे आग्नेया वैष्णवी तथा ॥ ३६ ॥

माहेश्वरी पातु याम्ये चामुण्डा नैऋते सदा ।
कौमारी वारुणे पातु वायव्ये अपराजिता ॥ ३७ ॥
वाराहीचोत्तरे पातु ईशान्यां नारसिंहिका ।
अध ऊर्ध्वे पातु काली पार्श्वेपृष्ठे च कालिका ॥ ३८ ॥

जलेस्थले च पाताले शयने भोजनेगृहे ।
राजस्थाने कानने च विवादे मरणे रणे ॥ ३९ ॥
पर्वते प्रान्तरे शून्ये पातु मां कालिका सदा ।
शवासने श्मशाने वा शून्यागारे चतुष्पथे ॥ ४० ॥

यत्र यत्र भय प्राप्ति: सर्वत्र पातु कालिका ।
नक्षत्र तिथि वारेषु योगं करणयोरपि ॥ ४१ ॥
मासे पक्षे वत्सरे च दण्डेयामेनिमेषके ।
दिवारात्रौ सदा पातु सन्ध्ययो: पातु कालिका ॥ ४२ ॥

सर्वत्र कालिका पातु कालिका पातु सर्वदा ।
सकृद्य: श्रृणुयानित्यं कवचं शिव निर्मितम् ॥ ४३ ॥
सर्वपापं परित्यज्य गच्छेच्छिवस्यचालयम् ।
त्रैलोक्यमोहनं दिव्यं देवतानां सुदुर्लभम् ॥ ४४ ॥

य: पठेत्साधकाधीश: सर्वकर्म जपान्वित: ।
सर्वधर्मेद्भवद्धर्मी सर्वविद्येश्वरेश्वर: ॥ ४५ ॥
कुबेर इव वित्ताढय: सुवाणी कोकिलस्वर: ।
कवित्वे व्यास सदृशो गणेशवच्छतीधर: ॥ ४६ ॥

कामदेव समोरूपे वायुतुल्यः पराक्रमे ।
महेश इव योगीन्द्र ऐश्वर्ये सुरनायकः ॥ ४७ ॥
बृहस्पतिसमोधीमां जरामृत्युविवर्जितः ।
सर्वज्ञः सर्वदर्शी च निःपापः सकलप्रियः ॥ ४८ ॥

अव्याहतगतिः शान्तो भार्यापुत्र समन्वितः ।
यो देहे कुरुते नित्यं कवचं देवदुर्लभम् ॥ ४९ ॥
न शोकोनभय क्लेशो न रोगोन पराजयः ।
धनहानिर्विषादोय परिवारोभवेन्नहि ॥ ५० ॥

सङ्ग्रामेषु जयेच्छत्रून्यथावह्निर्दहेद्वनं ।
ब्रह्मास्त्रादिनिवास्त्राणि पशवः कण्टकादमः ॥ ५१ ॥
तस्यदेहं न भिन्दति वज्राधिक भवेद्वपुः ।
ग्रहभूतपिशाश्च यक्ष राक्षस किन्नराः ॥ ५२ ॥

सर्वे दूरात्पलायन्ते हिंसको नश्यति ध्रुवम् ।
तद्देहं न दहेदग्नि न तापयतिभास्करः ॥ ५३ ॥
न शोषयति वातोपि न क्लेदं कुरुतेपयः ।
पुत्रवत्पाल्यते काल्या न हिमं कुरु ते शशी ॥ ५४ ॥

जलसूर्येन्दुवातानां स्तम्भकेनात्र संशयः ।
बहु किं कथयिष्यामि सर्वसिद्धिमुपा लभेत् ॥ ५५ ॥
राज्यं भोगं सुखं लब्ध्वा स्वेच्छयापि शिवो भवेत् ।
मोहन स्तम्भनाकर्षमारणोच्चाटनं भवेत् ॥ ५६ ॥

काकवन्ध्या च यानारी वन्ध्या वा मृतपुत्रिका ।
कण्ठे वा दक्षिणे बाहौ लिखित्वा धारयेद्यदि ॥ ५७ ॥
तदापुत्रो भवेत्सत्यं चिरायुः पण्डितः शुचिः ।
स्वामिनो वल्लभासापि धनधान्य सुतान्विता ॥ ५८ ॥

इदं कवचमज्ञात्वा यो जपेत्कालिकामनुं ।

ध्यानेनकोटिजप्तेन तस्य विद्या न सिद्ध्यति ॥५९॥
पदे पदे भवेद्दुखं लोकानानिन्दतो ध्रुवम् ।
इहलोके भवेद्दु:खी परे च नरकं व्रजेत् ॥६०॥

गुरुं मनुं समं ज्ञात्वा यः पठेत्कवचोत्तमम् ।
तस्य विद्या भवेत्सिद्धा सत्यं सत्यं वरानने ॥६१॥
य इदं कवचं दिव्यं प्रकाश्य शिवहाभवेत् ।
भक्ताय श्रेष्ठपुत्राय साधकाय य प्रकाशयेत् ॥६२॥

**॥ इति श्री त्रैलोक्य मोहन काली कवचम् सम्पूर्णम् ॥**

allastrologysolutions.com